# Shri Datta Stotram

# શ્રીદત્તસ્તોત્રમ્

## Document Information

Text title : Shri Datta Stotram

File name : dattastotramshrIdharasvAmI.itx

Category : deities_misc, shrIdharasvAmI, dattatreya, stotra

Location : doc_deities_misc

Author : Shridharasvami

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2023

*sanskritdocuments.org*

# શ્રીદત્તસ્તોત્રમ્

(પૃથ્વીવૃત્તમ્)

સુદુઃખિતમનોરવં મમ ન કિં શ્રુણોસિ પ્રભો
  દયાબ્ધિરપિ કિં ન ભો દ્રવસિ સર્વવિત્ ત્વં ગુરો ।
અહં વિરહકાતરો ભવભયાતુરઃ પ્રાર્થયે
  સ્વભક્તભવનાશનોદ્યતમતે ન કિં ધાવસિ ॥ ૧॥

ન કિં હરિહરાદયઃ શરણભક્તચિત્તાર્થદાઃ
  કિમર્થમિતિ યાસિ માં હિ શરણં પ્રભો વક્ષિ ચેત્ ।
ગુરો શ્રુણુ ભવાર્તિહંસ્ત્રિવિબુધી વિલીના ત્વયિ
  ત્રિમૂર્તિરથ ભો યતસ્ત્વમિહ તત્પ્રસિદ્ધં ભુવિ ॥ ૨॥

સ્વરૂપસ્મરણં સદા ભવતિ યત્ત્રયાણામપિ
  ત્વદીયપદસેવનાદ્વિધિહરાદયઃ શર્મદાઃ ।
શુભત્રિવદનૈર્યતઃ પ્રકટિતં ચ સચ્ચિત્સુખં
  ત્વમેવ નિરુપાધિકં ભવસિ ભોસ્ત્રિમૂર્તેઃ પદમ્ ॥ ૩॥

ઉપાધિપદલાઞ્છનાદ્બહુવિલજ્જિતૈસ્તૈસ્ત્રિભિઃ
  યદા પ્રકટિતં નિજં પ્રકટનં તવાસીત્પ્રભો ।
ત્વદીયનિરુપાધિકં વિમલરૂપમાદર્શયન્
  ત્વમેવ ખલુ રાજસે જગતિ દત્ત તુર્યાશ્રમિન્ ॥ ૪॥

અસઙ્ગ નિજનિર્મલં પ્રથિતનિર્ગુણં બ્રહ્મ યત્
  ત્રિમૂર્તિપદપાવનં પ્રકટિતં યદાસીત્ત્વયા ।
તદવ સકલસ્ય વા મમ ચ શુદ્ધરૂપ યતઃ
  ગુરો તવપદં વિના જગતિ મે ન કોપ્યાશ્રયઃ ॥ ૫॥

ત્રિમૂર્તિપદપાવનં સુખમનામયં ભોઃ પુરા
  સ્વભક્તભવમુક્તયેઽત્ર ભુવિ દત્તવાંસ્ત્વં યતઃ ।
સ્વદત્ત ઇતિ યત્સ્ફુટં જગતિ તન્મૃષા કિં ભવેત્

સ્વરૂપમમલં ચ દાતુમપિ કિં ન ભાસિ પ્રભો ॥ ૬॥

ન જીવજગદીશ્વરા ન ચ તથૈવ યોષિત્પુમાન્
“અહં” મમ તનૌ ચ યત્સ્ફુરતિ તત્સુભૂમાસુખમ્ ।
અસઙ્ગમિતિ ચિન્મયં પરમનામયં બ્રહ્મ વા
તતં પ્રથિતમદ્વયં હિ ખલુ ત્વન્મુખાજ્છુશ્રુષુઃ ॥ ૭॥

મહેન્દ્રવિધિચક્રધૃદ્ભવપદં ન યાચે ગુરો
વિષં મમ તુ તત્સુખં તનુહદિન્દ્રિયૈર્યદ્ભવેત્ ।
અહો ભવભયાત્મકં ભ્રમમયં ચ તદ્ભાવનં
રતિશ્ચ પુરુષસ્ત્રિયોરહહ કશ્મલાયાં તનૌ ॥ ૮॥

ગુરોઃ સુકરુણોદયાદ્ભવતિ સા વિરક્તિર્દૃઢા
નિજસ્થિતિરચઞ્ચલાઽત ઇહ યાચ્યતે ત્વત્કૃપા ।
ત્વદીયકૃપયા બલી નિજપદં વિતન્બન્ભુવિ
કૃતી ચ ગુરુસેવયા સુવિમલો ભવેયં ગુરો ॥ ૯॥

ગુરો ન તવ દર્શનં વિપુલદીર્ઘકાલો ગતઃ
કદા ભવસિ ગોચરસ્તવ હિ દર્શનાકાઙ્ક્ષ્યહમ્ ।
અયોગ્યમપિ શાધિ માં કરુણયાઽતિદીનોસ્મ્યહં
ગુરોઽતિદયયા યુતો ઝટિતિ દર્શનં દેહિ મે ॥ ૧૦॥

ગુરો હ્યતનુરેવ ભોસ્ત્વમસિ નામરૂપં ન તે
ઉપાસકવિમુક્તયેઽત્ર ખલુ રૂપધૃક્ત્વં વિભો ।
વિના સગુણરૂપતસ્તવ કિમસ્તિ જીવોન્નતિઃ
ન મુક્તરથ નો તથા વિરતિરેષ બોધોદયઃ ॥ ૧૧॥

સ્ફુટં સ્તવનતોઽપિ મે તવ સુવાક્પરત્વં ગુરો
તથૈવ તવ ચિન્તનેઽપિ તવ હૃત્પરત્વં સ્મૃતમ્ ।
સ્વરૂપમમલં તતં ન તવ વિસ્મૃતં યાત્રયા
તથાઽપિ હૃદિ વાસનોલ્લસતિ દર્શનાય પ્રભો ॥ ૧૨॥

અરે ત્વમસિ નિર્ગુણો ન ચ તવાસ્તિ સઙ્ગઃ ક્વચિત્
યદેકપરમાદ્વયં ત્વમસિ માયિકં ન ત્વયિ ।
કિમેવમતિદુઃખિનં ચ તવ નિર્ગુણં માં વદેત્
સુખામૃતકરાન્વિતન્વદિહ તે વપૂ રાજતે ॥ ૧૩॥

ન રૂપધરણં તવાસ્તિ ખલુ બાધકં સદ્ગુરો
　　હ્યનેન જગતોઽપિ મેઽતિસુલભોઽત્ર બન્ધક્ષયઃ ।
તનાવહમિતિ સ્ફુરેદ્યદિ ભવી ભ્રમિષ્ઠોઽપ્યસૌ
　　નિજાત્મપદવીં દિશન્ક્રિમિતિ દેહધૃક્ત્વં ભવેઃ ॥ ૧૪॥

જલં ન ચ હિમેન વાઽત્ર કટકૈઃ સુવર્ણં તથા
　　વિભિન્નમુપલૈશ્ચ ભો મૃદિહ ચન્દનં મૂર્તિતઃ ।
વિનિષ્ટમપિ નો ભવેદ્વિકૃતિમત્પ્રસિદ્ધં ચ તત્
　　પરં તુ જગતોઽમુના બહુવિશેષકાર્યં કિલ ॥ ૧૫॥

તવાસ્તિ નનુ બાધકં યદિ તુ રૂપધૃક્ત્વં ગુરો
　　કથં જગતિ વિશ્રુતોઽસિ ભગવસ્તમત્રેઃ સુતઃ ।
વિલોભય ન માં જડં કિલ ગુરોઽત્ર મે ત્વં ગતિઃ
　　પ્રભો ત્વરય મા ચિરં ચરણદર્શનં પ્રાર્થયે ॥ ૧૬॥

તવ ત્રિમુખપઙ્કજૈઃ પ્રકટિતં સ્વસચ્ચિત્સુખં
　　ત્વદીય વદનપ્રભા ખલુ નિદર્શયેદ્ બ્રહ્મ તત્ ।
સુહાસ્યમતિનિર્મલં તવ વદેજ્જગન્માયિકં
　　ત્વદીયકરુણાર્દ્રદૃગ્ ઝટિતિ માયિકં સંહરેત્ ॥ ૧૭॥

અહં હ્યતનુનિર્ગુણં કથમહં શરીરીતિ ચ
　　શરીરધરણેઽક્ષમોઽહમિતિ મા ગુરો મા વદ ।
કદાપિ ભવસીહ ભો ન ચ વિકારયુક્ત્વં વપુઃ
　　ન ચેદવતરેઃ સ્વયં કથમિતિસ્વરૂપં દિશેઃ ॥ ૧૮॥

ન ભૂરથ ન વા જલં ન ચ તથાઽનલો વાઽનિલો
　　ન ખં ત્વયિ વિભો તથા કિમપિ નૈવ પઞ્ચીકૃતમ્ ।
ન પિણ્ડમથવાઽપિ નો ખલુ વિરાણ્ણ વિશ્વં ધ્રુવં
　　ન જીવ ઇતિ વાસના રતિરથો ન નારી નરઃ ॥ ૧૯॥

ન સા પ્રકૃતિરપ્યહો ત્વયિ પુમાઞ્જગત્સર્જનં
　　ચિદેકરસભૂમ્નિ ભોસ્ત્વયિ ન વિશ્વસઙ્કલ્પનમ્ ।
ન સૂક્ષ્મ વિયદાદ્યહો ન ચ તથાઽપ્યાપઞ્ચીકૃતં
　　ન સૂક્ષ્મ મહદાદિકં ન ચ હિરણ્યગર્ભસ્તથા ॥ ૨૦॥

નિરાવૃતગુરો તમસ્ત્વયિ વિભાતિ કિં સ્વપ્રભે
　　ન દૃશ્યમપિ નો તથા ભવતિ ભોસ્તદવ્યક્તકમ્ ।

મહેશ ઇતિ નો તથા ખલુ ન બીજસૃષ્ટિશ્ચ યા
    સ્વમાત્રપરમાદ્વયે કથમિદં ચ સમ્ભાવ્યતે ॥ ૨૧॥

ન જીવજગદાદિકં ત્વમિતિ ભો મહેશોઽપિ નો
    ન કાર્યમપિ નો તથા ભવસિ કારણં તસ્ય તત્ ।
ગુરોઽસ્ય તુ વિભાવનં ત્વયિ યથાત્ર રજ્જૌ ફણી
    ન ખે જલમુચઃ કૃતિસ્ત્વયિ તથા ન માયાકૃતિઃ ॥ ૨૨॥

અહો ઘટયતે ગુરોઽઘટિતમેવ માયા તુ યા
    નિરૂપયિતુમાસ્પદા ન ખલુ સાતિશઙ્કાસ્પદા ।
અતીવ નનુ વિસ્મયા ભવતિ હન્ત સત્યાઽસતી
    ત્વયૈવ કિલ નશ્યતિ સ્વયમતઃ પ્રતીક્ષેઽનિશમ્ ॥ ૨૩॥

અનેકદુરદૃષ્ટતો બહુલવિઘ્નબાધા ગુરો
    મનસ્તુ બહુ ચઞ્ચલં ભ્રમતિ દિગ્પટે દુર્દમમ્ ।
ન વજ્રતનુરપ્યહો ભવતિ દુશ્ચરં નો તપો
    ન શુદ્ધહૃદયં તથાપિ બત કિં વદેયં પ્રભો ॥ ૨૪॥

ન શાસ્ત્રમપિ નો શ્રુતિં ન ચ તથા સ્મૃતિં વેદ્મ્યહં
    ન સંસ્કૃતમથાપ વા ખલુ ન વેદ્મ્યહં પ્રાકૃતમ્ ।
ન ભક્તિરપિ મેઽસ્તિ ભો ભવતિ નૈવ યોગસ્તથા
    હ્યહો જડમતિર્ગુરો કિમુત વેદ્મિ કિં બ્રહ્મ તત્ ॥ ૨૫॥

નિજં હિ કથયામિ તે તનુસુખાય લુબ્ધોસ્મ્યહં
    ભવેત્કથમુપોષણં વ્રતમપીતિ કૃચ્છ્રાદિકમ્ ।
અતીવ ખલુ દુર્બલો મમ ન નિગ્રહોઽસ્તિ ક્વચિત્
    અહં પતિત ઈદૃશઃ પતિતપાવનસ્ત્વં ગુરો ॥ ૨૬॥

ગુણેન રહિતોઽસ્મ્યહં સકલદુર્ગુણાલઙ્કૃતઃ
    ન કોઽપિ ખલુ મત્સમઃ સકલનીચમૌલિસ્ત્વહમ્ ।
સુવીક્ષ્ય ચ મમેદૃશં ત્યજસિ ચેત્કુતોઽન્યાશ્રયઃ
    ત્વમેવ ગતિરત્ર મે કરુણયા પદં દર્શય ॥ ૨૭॥

સમર્થ ઇતિ વિશ્રુતોઽસિ ભુવિ કિં ન શક્યં ત્વિદં
    ગુરો ખલુ પરીક્ષ્ય મામિહ ન, પાહિ હીનોસ્મ્યહમ્ ।
અહં યદિ સમુદ્ધૃતો ભુવિ ન દુર્ઘટં તે ભવેત્
    સુસાધ્યમખિલં તતઃ કુરુ દયાં ચ મામુદ્ધર ॥ ૨૮॥

અતીવ વિનતોસ્મ્યહં વિષયમોહપાશાર્દિતઃ
    ક્ષણં યુગસમં ભવેદ્વિરહતોઽતિદુઃખી ગુરો ।
જલાબ્દહિરહો યદા ભવતિ કિં સુખી મત્સ્યકઃ
    તથૈવ બહિરાગતસ્તવ નિજસ્થિતેરસ્મ્યહમ્ ॥ ૨૯॥

ઉપાધિત ઇતિ બ્રુવે નિજમથોઽમલં વેદ્મ્યહં
    ત્વયૈવ નિરુપાધિકો નનુ ગુરો ન માં ત્વં જહિ ।
અસઙ્ગ ઉપવિદ્ધ ભોઃ સતતમાત્ર મામુદ્ધર
    યદિ ત્વમહમેવ તત્કિમિતિ હાતુમર્હો ભવેઃ ॥ ૩૦॥

પ્રભો ત્યજસિ માં હિ ચેત્તવ ન દર્શનં દાસ્યસિ
    ન શક્ય ઇતિ ભો ગુરો ખલુહસન્તિ કીર્તિર્ન તે ।
મદીયમપિ જીવનં ભવતિ ગર્હિતં હે પ્રભો
    જહી હિ ન ગુરો કૃપાં કુરુ ચ દર્શનં દેહિ મે ॥ ૩૧॥

વદેયમિતિ કિં ગુરો સકલહૃદ્ગતં વેત્સિ ભોઃ
    સ્તુવે કિમધિકં સ્તુતે શ્રુતિરહો પ્રભો ત્વાં સદા ।
અનેકસગુણૈર્વૃતા મદધિકાશ્ચ ભક્તાસ્તવ
    ત્વમેવ હિ ગુરોઽદ્વયો મમ તુ કોઽપિ નાન્યો ભુવિ ॥ ૩૨॥

વિચાર્ય સકલં ગુરો કુરુ તથા યથા ત્વન્મતિઃ
    બલાત્કિમિહ શક્યતે સવિનયેન ભોઃ પ્રાર્થયે ।
અનાથમિતિ માં ગુરો કુરુ સનાથમસ્મિઞ્જને
    હ્યતીવ દયયાયુતો ઝટિતિ દર્શનં દેહિ મે ॥ ૩૩॥

સનાતન ઇતિ શ્રુતો ભવતિ વિશ્વસેતુસ્તુ યો
    ભવત્પ્રભવધર્મ એવમિહ દુષ્ટદૈત્યૈર્હૃતઃ ।
સતીત્વમપિ લાઞ્છિતં કિલ વિડમ્બનં દુઃસહં
    પ્રભો સ્વજનરક્ષણે કિમિતિ શઙ્કસેઽદ્યાપિ હિ ॥ ૩૪॥

મુમુક્ષુજનદુર્દશા કથમિયં ચ સહ્યા તવ
    મુમુક્ષુજનજીવિતં બહુ વિગર્હિતં લૌકિકૈઃ ।
હસન્તિ પરમાર્થિનં ખલુ ન વિશ્વસન્તીહ તે
    સુરા અપિ છલન્તિ ભો બહુબલાચ્ચ કામાદિકૈઃ ॥ ૩૫॥

કલૌ તુ પરમાર્થિનાં જગતિ જીવનં કષ્ટદં

અહં ખલુ ન તત્સહે તવ તદર્થમેવાશ્રયઃ ।
સ્વરૂપપથગામિનસ્ત્વમિહ મે સહાયો ભવ
ગુરોઽતિદયયાયુતસ્તવ પદામ્બુજં દર્શય ॥ ૩૬॥

અતીવ ખલુ દુર્જયા સન્તત કશ્મલા દુશ્ચરા
સદૈવ સુખમાહિતા વિષયવાસના યોજને ।
અહો દુરિતરૂપિણી કિલ ભવેદવિદ્યા તુ યા
તવૈવ કૃપયા વિના ન ચ કદાપિ શામ્યેદ્ગુરો ॥ ૩૭॥

સ્વયં હિ ન સહાયકૃદ્ભવસિ સાધકાનાં યદિ
વૃથા કિમિતિ રાજસે ત્વમિહ દત્તનામ્ના ગુરો ।
તુરીયપદનન્દિનઃ પતિતપાવનસ્ય પ્રભો
કિમિપ્સિતસુખં ચ તે જગતિ જીવમોક્ષાદૃતે ॥ ૩૮॥

ક્ષમસ્વ દયયાયુતો યદિ ભવેદ્ દુરુક્તિર્મમ
ક્ષમસ્વ ચ ગુરો કુતોઽપિ વિનયસ્ય ભઙ્ગો યદિ ।
ન હેતુરિહ મે પ્રભો ભવતિ તાદૃશો વેત્સિ માં
ત્વમેવ મમ જીવનં ગતિરપિ સ્વભૂમ્નઃ સુખમ્ ॥ ૩૯॥

દયાબ્ધિરમિતોઽસિ ભોઃ સકલભૂતવાસો ગુરુઃ
સ્વતન્ત્ર સકલાર્થ વિત્સુનિપુણો જગત્પાવનઃ ।
તવાત્ર જગતીતલે પ્રકટનં ચ યત્સ્વેચ્છયા
સ્વભક્તજનમુક્તયે ધ્રુવમિદં હિ દત્ત પ્રભો ॥ ૪૦॥

વિલમ્બય જગદ્ગુરો ક્ષણમપીહ મા ધાવને
ત્વદીય પદદર્શનાજ્જગતિ માં સનાથં કુરુ ।
અપાવૃણુ વિમોહનં સકલમાયિકં બન્ધનં
ત્વદીય સકલાત્મકે સ્થિરપદે ચ માં સ્થાપય ॥ ૪૧॥

ત્વદીય પદદર્શનાત્સકલદુઃખ શાન્તિર્નૃણાં
ત્વદીય પદપઙ્કજં દહતિ દુષ્કૃતં પાપકમ્ ।
કથં વસતિ તત્તૃણં ધગધગાવમાનેઽનિલે
કથં સ્થિરતિ તત્તમો ગગનમધ્યસૂર્યાતપે ॥ ૪૨॥

કિમર્થમિતિ શઙ્કસે ન ચ કિમર્થમાયાસિ ભો
ભવેન્ન મમ દુષ્કૃતં કિમપિ ચેત્તવાગ્રે ગુરો ।
કિમસ્તિ ખલુ વિઘ્નકૃત્પ્રતિવિધાતુમત્ર પ્રભો

ત્વમેવ પરમં બૃહત્તવ સમો ન કોવાऽધિકઃ ॥ ૪૩॥

ન દેવરજનીચરૌ મનુજવન્યવક્ષાદિકાઃ
ક્ષમાશ્ચ દમને તદા મનસિ ચેત્તવાસ્તીહ ભોઃ ।
વિધિર્ન ચ કુયોગ ઇત્યપિ ભવેન્ન ચોપાસનં
કિમસ્તી ખલુ વિઘ્નકૃત્તવ ન દર્શનં મે ગુરો ॥ ૪૪॥

ન કર્મ સચિવોऽસિ ભોઃ ફલિતમીક્ષસે ચેદ્ગુરો
ન યોગ ઇતિ વક્ષિ ચેત્કથમિદં ત્વયા ભાવ્યતે ।
સ્વતન્ત્ર નિરુપાધિકઃ સકલમઙ્ગલસ્ત્વં યતઃ
વિલોભય ન માં ગુરો ઝટિતિ દર્શનં દેહિ મે ॥ ૪૫॥

કિમર્થમતિનિર્ઘૃણો ભવસિ ભો દયાસાગરઃ
દયાબ્ધિરપિ નિર્ઘૃણો મમ ન વાક્વદેત્તત્વતઃ ।
કિમર્થમતિદુર્લભં ચરણદર્શનં તે વદ
નિરૂપયિતુમપ્યહોऽત્ર તવ હેતુમાયાહિ ભોઃ ॥ ૪૬॥

અહો ન ખલુ વારિતો ભવતિ સંશયો ભો યદા
ન સોऽહમિતિ વેદયઃ પશુસમઃ સ વેદોऽવદત્ ।
નિજં હિ કથયામિ તે મમ ન વિસ્મૃતં તત્કદા
હ્યહં ત્વમિતિ નિશ્ચયો મમ ન સંશયોऽસ્મિન્ક્વચિત્ ॥ ૪૭॥

ન મૃત્યુવશગો ગુરોऽહમિતિ ભેદભાનેન ભો
ન ભીરપિ ભવેત્પ્રભો ભવતિ સા દ્વિતીયાદ્યતઃ ।
અહં ત્વમિતિ ચેત્કથં ચિરયસે ગુરો માં વદ
કિમર્થમણુસંશયો જહિ હિ તે પદં દર્શય ॥ ૪૮॥

અહો જગદિદં ગુરો વિવિધનામરૂપાત્મકં
તથાપિ નિજમાત્રતોऽત્ર ખલુ વેદ્મ્યહં તદ્યથા ।
તથૈવ તવદર્શને મમ ન ભિન્નભાવં ક્વચિત્
તથાપિ જગતીતલે ભવતિ તેન કાર્યં બૃહત્ ॥ ૪૯॥

અધર્મરુચયો જના બત હિતં ન જાનન્તિ યત્
અનીતિવશવર્તિનં હિ બહુમન્વતે લૌકિકાઃ ।
અહો જગતિ દુર્લભા ભવતિ તત્ત્વદૃષ્ટિર્ગુરો
ધ્રુવં હિ તવ દર્શનં કિલ તવાવતારો ભુવિ ॥ ૫૦॥

ગુરો ચિરય મા પ્રભો ત્વરય હર્શનં દેહિ મે
    બ્રુવે કિમધિકં સ્તુવે ચિરમથો વિભોઽસ્માત્પરમ્ ।
અતિપ્રણતવત્સલોઽસિ ખલુ વિશ્વકલ્યાણકૃત્
    મનોભિલષિતં તવાસ્તુ નિજભૂમ્નિ માં સ્થાપય ॥ ૫૪॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસદ્ગુરુભગવતા
શ્રીધરસ્વામિના વિરચિતં શ્રીદત્તસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Paresh Panditrao

*Shri Datta Stotram*

pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*